## एकवचनं सम्बुद्धिः । (४९/१९२)

[1]आमन्त्रितप्रथमाया [2]यदेकवचनं, तत् सम्बुद्धिसञ्ज्ञं भवति । हे [3]पटो । हे देवदत्त । सम्बुद्धिप्रदेशाः – 'एङ्ह्रस्वात् सम्बुद्धेः' (६.१.६९/१९३) इत्येवमादयः ॥

## षष्ठी शेषे । (५०/६०६)

कर्मादिभ्योऽन्यः प्रातिपदिकार्थ[4]व्यतिरेकः स्वस्वामिसम्बन्धादिः शेषः, तत्र [5]षष्ठी विभक्तिर्भवति । राज्ञः पुरुषः । पशोः पादः । पितुः पुत्रः[6] ॥

## ज्ञोऽविदर्थस्य करणे । (५१/६१२)

[7]जानातेरविदर्थस्याज्ञानार्थस्य करणे कारके षष्ठी विभक्तिर्भवति । सर्पिषो जानीते । मधुनो जानीते । सर्पिषा [8]करणेन प्रवर्तते इत्यर्थः । प्रवृत्तिवचनो[9] जानातिरविदर्थः[10] । अथ वा मिथ्याज्ञानवचनः । सर्पिषि [11]रक्तः प्रतिहतो वा । चित्तभ्रान्त्या [12]तदात्मना सर्वमेव ग्राह्यं प्रतिपद्यते ।[13] मिथ्याज्ञानमज्ञानमेव । अविदर्थस्य इति किम् ? स्वरेण पुत्रं जानाति[14] ॥

## अधीगर्थदयेशां कर्मणि । (५२/६१३)

शेषे इति वर्तते । अधीगर्थाः स्मरणार्थाः, 'दय [15]दानगतिरक्षणेषु' (धा.पा. ४८१), 'ईश ऐश्वर्ये' (धा.पा. १०२१), एतेषां कर्मणि कारके शेषत्वेन विवक्षिते षष्ठी विभक्तिर्भवति । मातुरध्येति[16] । मातुः स्मरति[17] । सर्पिषो [18]दयते । सर्पिष ईष्टे । [19]मधुन ईष्टे । कर्मणि [20]इत्येव, मातुर्गुणैः स्मरति । शेषे इति किम्? मातरं स्मरति ॥

## कृञः प्रतियत्ने । (५३/६१४)

सतो गुणान्तराधानं प्रतियत्नः । करोतेः [21]कर्मणि कारके शेषत्वेन विवक्षिते प्रतियत्ने गम्यमाने षष्ठी विभक्तिर्भवति । एधोदकस्योपस्कुरुते । [22]शस्त्रपत्रस्योपस्कुरुते । प्रतियत्ने इति किम्? कटं करोति । कर्मणि इति [23]किम्? एधोदकस्योपस्कुरुते [24]प्रज्ञया । शेषे इत्येव, एधोदकमुपस्कुरुते ॥

---

1. सम्बोधनप्रथमायाः ह. 2. यत् तद् नास्ति फ. 3. बटो ड. फ. ह. 4. °व्यतिरिक्तः अ.ब.क.ई. 5. शेषे इत्यधिकम् क.ह. 6. शेषे सम्बन्धे यदप्रधानं तच्छेषशब्देनोच्यते । तेन उभयत्र पर्यायेण च न भवति षष्ठी इत्यधिकम् ड. 7. शेषे इत्यनुवर्तते इत्यधिकम् अ. 8. करणभूतेन क.ड.फ.इ. 9. अत्र इत्यधिकम् ग. 10. भवति इत्यधिकम् ड. 11. सक्तः फ. 12. तदा ग. 13. सर्पिषो जानीते । मधुनो जानीते इत्यधिकम् क.ड.फ.ग. 14. शेषे इत्येव, सर्पिषा जानीते इत्यधिकम् क.ड. 15. '°रक्षणहिंसादानेषु' धा.पा., रक्षणादानेषु ग. 16. पितुरध्येति इत्यधिकम् क.ड.फ.ग. 17. पितुः स्मरति इत्यधिकम् क.ड.फ.ग, मातुः स्मरति नास्ति फ. 18. धयते ग, मधुनो दयते इत्यधिकम् क.इ.ग. 19. उदाहरणमिदं नास्ति फ. 20. इति किम् अ.फ.ई. 21. कर्मकारके इ. 22. शास्त्रस्योपस्कुरुते, पत्रस्योपस्कुरुते क, शस्त्रं पत्रस्योपस्कुरुते ब, शस्त्रं यन्त्रस्योपस्कुरुते ड, काण्डं गुडस्योपस्कुरुते ह. 23. एव क. 24. प्रभया ड.